Roll No. : .......................................

Total No. of Questions : **12** ]

[ Total No. of Printed Pages : **4**

# APF–2043

## M.A. (Final) Examination, 2022

## SANSKRIT

Paper - IX (अ) क

**[वर्ग अ (क)]**

**(प्राचीन काव्य)**

*Time : 3 Hours* ]

[ *Maximum Marks : 100*

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. अधोलिखित प्रश्नानामुत्तराणि देयानि (शब्द सीमा **50** शब्दा:)।

   (i) हिरण्यगर्भाङ्गभुव: क: ? (संस्कृतेन)

   (ii) 'चक्रपाणि:' इति कस्य विशेषणं वर्तते ? (संस्कृतेन उत्तरं दीयताम्)

(iii) 'यस्याश्चौरश्चिकुरनिकर:' इत्युक्ति: कस्य कवे: कृते प्रसिद्धा ?

(iv) महाकवि बिल्हण विरचित ग्रन्थानां नामानि लिखत।

(v) नैषधीयचरितं महाकाव्ये कति सर्गा: सन्ति ?

(vi) वृहत्त्रयी मध्ये परिगणित महाकाव्यानां नामानि लिखत।

(vii) 'चम्पूभारतम्' काव्यस्य का विधा वर्तते ?

(viii) 'चम्पूभारतम्' काव्ये कस्य वर्णनं कृतम् अस्ति ?

(ix) 'पाषाणत्रयम्' कस्य महाकाव्यस्य विशेषता वर्तते ?

(x) किरातार्जुनीयम् महाकाव्यस्य प्रणेता क: ?

**खण्ड–ब**

**नोट** :– अधोलिखितेषु प्रश्नेषु केचन पञ्च प्रश्ना: समाधेया:। द्वितीय: तृतीय: च प्रश्नौ अनिवार्यौ स्त:।

2. अधोलिखित श्लोकस्य संस्कृत व्याख्या कार्या–

श्रिय: पति: श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।

वसन् ददर्शावतरन्तम्बराद् हिरण्यगर्भाङ्गभुवं मुनिं हरि:॥

**अथवा**

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हराऽमराङ्गना:।

विगृह्य चक्रे नमुचिद्विषा वशी य इत्थमस्वास्थ्यमहर्निशं दिव:॥

3. अधोलिखित श्लोकस्य ससन्दर्भ संस्कृत व्याख्या कार्या–

अनभ्रवृष्टि: श्रवणामृतस्य सरस्वतीविभ्रमजन्म भूमि:।

वैदर्भरीति: कृतिनामुदेति सौभाग्यलाभप्रतिभू: पदानाम्॥

**अथवा**

यत्पार्थिवै: शत्रुकठोरकण्ठपीठास्थिनिर्लोठनकुण्ठधार:।

निन्ये कृपाण: पटुतां यदीयकपालशाणोपल पट्टिकासु॥

4. श्लोकस्य सप्रसङ्ग व्याख्या कार्या–

अधीतिबोधाचरण प्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।

चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्भि विद्यासु चतुर्दशस्वयम्॥

**अथवा**

कथा प्रसङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामानि श्रुते।

द्रुतं विधूयान्यदभूयताऽनया मुदा तदाकर्णन सज्जकर्णया॥

5. अधस्तन श्लोकस्य सप्रसङ्ग व्याख्या कार्या–

जग्राह निग्रहपरः परश्रियां करैः कराग्रेण करेणुचङ्गमः।

कुन्तीं शकुन्तीशरथो यथा रमां समुद्रकाञ्चीं च स भद्रकन्यकाम्॥

**अथवा**

चित्रं चरित्रं जगतीतलेऽस्य न श्लाघयामा स नरेषु कोवा।

स यत्खयं पाण्डुरपि स्वकेन गुणेन रक्तान्करोत्समस्तान्॥

6. रघुवंश महाकाव्यस्य कथासारं स्वशब्देषु लिखत।

**अथवा**

किरातार्जुनीयमधिकृत्य भारवेरर्थगौरवं विवेच्यताम्।

7. अस्य श्लोकस्य सप्रसङ्ग व्याख्या कार्या–

हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।

शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥

**अथवा**

पुराणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कञ्चुकाः।

स्वरूपशोभैकगुणानि नाकिनां गणैस्तमाशङ्क्य तदादि चक्रिरे॥

8. निम्नलिखित श्लोकस्य सप्रसङ्ग व्याख्या करणीया–

महारथस्याऽध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशः सितम्।

रदाऽवदातांऽशुमिषादनीदृशां हसन्तमन्तर्बलमवतां रवेः॥

**अथवा**

न दुर्जनानामिह कोऽपि दोषस्तेषां स्वभावो हि गुणासहिष्णुः।

द्वैष्यैव केषामपि चन्द्रखण्डविपाण्डुरा पुण्ड्रकशर्कराऽपि॥

## खण्ड–स

**नोट** :– अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं लिख्यताम् (शब्द सीमा **500** शब्दाः)।

9. 'मेघे माघे गतं वयः' इत्युक्तिं शिशुपालवधमधिकृत्य विवेच्यताम्।

10. श्रीहर्षस्य व्यक्तित्वं कृतित्वं च विस्तरेण विवेचयत।

11. ऐतिहासिक महाकाव्यरूपेण 'विक्रमाङ्कदेवचरितम्' महाकाव्यस्य समीक्षणं क्रियताम्।

12. कुमारसम्भवं महाकाव्यस्य कथानकं स्वशब्दैः लिखत।